क्र-नं. ६९

यथार्थ
प्रयोग

चलप्रतिष्ठा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३७८
३७८।

(1)

॥अथज्वलप्रतिभाप्रारंभः॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

चल्ल· ॥श्रीगणेशाय नमः॥अथ नृसिंहपरिचर्यायां चल्लार्चा विधिरु प्रति·
च्यते॥कुंडमंडपादि अवश्यं कार्यं॥यजमानः सुस्नातः सपत्नी
१ कः कृतनित्यक्रियो देशकालौ संकीर्त्य॥चतुर्विधपुरुषार्थसिध्य
र्थं अमुकमूर्त्तिप्रतिष्ठां करिष्ये॥इति संकल्प्य॥तदंग स्वस्तिपु
ण्याहवाचनमातृकापूजननांदीश्राद्धांतं कृत्वा॥आचार्यवरणं
कृत्वा॥तत्राशक्तः स्वयमेव कुर्यात्॥अथाचार्यः अग्निः सुमि
मितिसूक्तस्य वैश्वानरोग्निस्त्रिष्टुप्॥अग्न्युत्तारणे विनियो १

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

गः॥ अग्निपदरहितेनसहितेनअष्टसहस्रमष्टशतमष्ट
विंशतिरष्टौवापठन्॥ जलधारांपातयेत्॥ ततःयदत्रसंस्थित
मिति सर्षपान्विकीर्य॥ शुचीवइतितृचेन पंचगव्येनआपोहि
ष्ठेतिकुशोदकेनदेवयजनभूमिंप्रोक्ष्य॥ स्वस्त्ययनंतार्क्ष्यमिति
मंत्रद्वयेनसंप्रार्थ्य॥ देवाआयांतुयातुधानाःअपयांतुवि
ष्णोदेवयजनंरक्षस्वेति भूमौप्रादेशंकृत्वा॥ स्थंडिलेग्निंप्रति
ष्ठाप्य॥ आश्वलायनयजमानोअन्वाधानंकुर्यात्॥ स्थाप्यदे

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

चल॰ वृतां अमुकस्मिदाज्यचरुतिलाहुतिभिः प्रत्येकं अष्टोत्तरशत प्रति॰
संख्याकाभिः शेषेण स्विष्टकृतं॰ चरुश्रपणादि आज्यभागांतं
२ कृत्वा॥ लिंगमर्चावाईशान दिशि वेदिकायां वस्त्रावृते पीठे वा
स्थाप्य॥ अष्टकृत्वोमृदासंस्नाप्य॥ समंत्रकं पंचगव्येन स्ना-
त्वा॥ ततः पंचामृतेन अभिषिच्य॥ आचार्यादेः प्राच्याद्यष्ट
दिक्षु महीद्यौरित्यादिविधिना अष्टौ कलशान् वारिपूर्णान्
दूर्वासर्षपपंचपल्लवोपेतान् प्रतिष्ठाप्य॥ गंधपुष्पादिसंपौ २

(3A)

षधीः क्षिप्त्वा ॥ आपोहिष्ठेति तृचेन ॥ हिरण्यवर्णाः शुचयः ४
पवमानः सुवर्जन इति अनुवाकः ॥ देवस्य त्वेत्यादि मंत्रैः प्रतिक
लशं आवर्त्तैः कलशोदकैरभिषिंच्य ॥ वस्त्रगंधाद्यैरुपचारैर्ना
म मंत्रेणाभ्यर्च्य ॥ अग्नेः प्राच्यां सर्वतोभद्रे अष्टदले वा मध्यभा
स्थापिते भद्रपीठे अर्चामुपवेश्य ॥ तदाग्नादि दिक्षु अष्टौ वारि
पूर्णान् पूर्ववत्संस्थाप्य तत्रैव अष्टौ दीपान् पिष्टमयान् घृतपूरि
तान् प्रज्वाल्य ॥ उत्तरमेकं कलशं संस्थाप्य ॥ देवस्य दक्षिण

(५)

चल· पार्श्वेउदङ्मुखस्तिष्ठन्॥त्त्विग्दैवानामिग्नितृचेनसुवर्णशला प्रति०
कयागंधेनउन्मील्य॥देवस्यचेतिमधुनानेत्रांजनंकुर्यात्॥दक्षि
३ णसव्येदेवनेत्रेमंत्रावृत्त्यालिखेत्॥ततःआचार्योआदर्शंभ
क्ष्यादिदर्शयेत्॥अत्यूनंआदोभणद्देवदन्॥पुरुषसूक्तंश्राव
यित्वा॥तेनैवस्तुत्वा॥पंचवर्णोदनेनदेवस्यनीराजनंकृत्वा
॥त्त्विग्भ्यांनंबलिंदद्यात्॥ततःसर्वतोभद्रदेवताआवाहयेत् ३
॥मध्येब्रह्माणं॥पूर्वादिदिक्षुलोकपालान्॥ईशानेंद्रांतरा

(5A)

ळेवसून् रुद्रान् आदित्यान् अश्विनो विश्वान्देवान् पितॄन्
नागान् स्कंदवृषो ब्रह्मेशानादयंतराळेषु दक्षिणे विष्णुदुर्गां
स्वधाकारं मृत्युरोगान् समुद्रान् सरितः मरुतः गणपं निवे
ति ॥ मध्ये पृथिवीं मेरुं संस्थाप्य ॥ देवांश्चावाह्य ॥ आग्नेयादि वज्रं
शक्तिं । दंडं । खड्गं । पाशं । अंकुशं । गदां । शूलं । समावाह्य ॥ ऐंद्रीं
कौमारीं । ब्रह्माणीं । वाराहीं । चामुंडां । वैष्णवीं । माहेश्वरीं । वै
नायकीं । एतानामभिरावाह्य ॥ अंगदेवताः संपूज्य । आचा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

चल० र्यः देवं तन्मंत्रेणावाह्य ॥ मंडलमध्ये अर्चांसुप्रतिष्ठां भवेत्तिनि प्रति०
४ वेश्य ॥ स्वस्थंडिलमेत्य समिदाज्यचरुतिलद्रव्यैः मंडलदेवता
नामभिः ॥ दशदशाहुतीर्हुत्वा ॥ तथा पूर्वोक्तद्रव्यैः प्रतिद्रव्यं
अष्टोत्तरशतसंख्यया प्रतिमाय ॥ देवता मंत्रेण जुहुयात् ॥
एकैकद्रव्यहोमांते देवं स्पृशेत् ॥ आज्यहोमांते च उत्तरतः स्था
पयेत् ॥ कलशे संपातानाक्षिपेत् ॥ स्विष्टकृतादि पूर्णाहुति ४
होमशेषं समापयेत् ॥ अर्चासमीपं गत्वा ॥ प्रतिष्ठाप्य देवं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

हृदये ध्यात्वा ॥ सितपुष्प पूर्णांजलिं कृत्वा ॥ निजहृत्कमले सर्वसाक्षी
मयीं रमणीयां मनोमयीं तेजोमयीं ध्यात्वा ॥ तत्तेजो हृत्कमलेन ना
सामार्गेण करस्थपुष्पेषु निःसृतं विचिंत्य ॥ तत्पुष्पांजलिं स्वम
स्तकांतं नीत्वा सुमुहूर्तेन मंत्रोच्चारणपूर्वकं प्रतिष्ठपरमेश्वरशि
देवमूर्धनि पुष्पांजलिं क्षिपेत् ॥ तत्तेजो देवशरीरब्रह्मरंध्रद्वा
राप्रविशं ध्यायेत् ॥ ततः आ त्वाहार्षमंतरेधि ध्रुव० विशस्त्वास
र्वा वांछंतु० इहैवैधि माप च्योष्ठाः० इंद्रइवेह ध्रुवस्तिष्ठ० इममिं

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

चल॰ द्रोअद्रीधर॰तस्मैसोमोअधिब्रव॰ध्रुवाद्योध्रुवापृथिवी॰तदस्तु प्रति॰
५ मित्रावरु॰एहोवैप्रतिष्ठासूक्तं॰स्वशाखीयविधिनाप्रतिष्ठितो
भवति॥चलंप्रतिष्ठाप्य॥प्रणवेननिरुध्यप्राणप्रतिष्ठंकुर्या
त्॥अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः॥ऋ
ग्यजुःसामाथर्वाणिछंदांसि॥पराप्राणशक्तिर्देवता॥आंबीजं॥
ह्रींशक्तिः॥क्रोंकीलकं॥अस्याःप्राणप्रतिष्ठापनेवि॰॥ॐ
आंह्रींक्रोंयंरंलंवंशंषंसंहंसःसोहंदेवस्यप्राणाइहप्राणाः ॐ ५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

आंह्रींक्रोंयं॰देवस्यजीवइहस्थितः॥ॐआंह्रींक्रोंयरं॰देव
स्यसर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादप
यूपस्थइहागत्यसुखेचिरंतिष्ठंतुस्वाहा॥इतिदेवस्यहृदि
हस्तंदत्वाजपेत्॥अस्यदेवस्यअर्चायेमामहंतिकश्चमेग
तःप्रणवेनसंरुध्यजीवंध्यात्वा॥भुवायोगिरिद्विसुकंजत्वा
कर्णेगायत्रींदेवमंत्रंजपेत्॥रूपंतुक्तेनोपस्थाय॥पादना
भिशिरःस्पृष्ट्वाइहैवैधिमात्रिजपेत्॥ततोद्वादशंजपेत्॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(७)

चल० इतिप्राणप्रतिष्ठांविधाय ॥ सुमुद्रसंनोवरदोभवेतिसंप्रार्थ्य ॥ प्रति०

६ पुरुषसूक्तेनतत्तद्देवमंत्रेणवास्तुत्वा ॥ ततोवैदिकपौराणिकतां

त्रिकमन्यतमेनसमुच्चितेनवाविधिनादेवंपूजयेत् ॥ ततःस्ना

नोत्तरंपंचामृतैरभिषिंच्य ॥ ततःसंपातकलशोदकेनइमाआ

पःशिवतमाइतिमंत्रैश्चतेनैवसप्तकृत्वःसंस्नाप्य ॥ वस्त्राल

कारान्उपचारान्पुरुषाहारपर्याप्तनानानाविधिनैवेद्यं ६

सशर्करंपायसंवानिवेद्य ॥ महानीराजनंकृत्वा ॥ देवस्यपाद

(7A)

यो:पुष्पांजलिंप्रक्षिप्य॥प्रार्थयेत्॥स्वागतंदेवदेवेशमद्भा
ग्यात्त्वमिहागत:॥प्राकृतंत्वांमदृष्ट्वावाबालवत्परिपालय॥
॥१॥धर्मार्थकामसिध्यर्थंस्थिरोभवसुखायन:॥सान्निध्यंतु
सदादेवस्वार्चायांपरिकल्पय॥२॥यावच्चंद्रावनीसूर्यस्ति
ष्ठंत्यप्रतिघातिन:॥तावत्त्वयात्रदेवेशस्थेयंभक्तानुकंपया॥
॥३॥भगवन्देवदेवेशत्वंपितासर्वदेहिनां॥येनरूपेणभग
वंस्त्वयाव्याप्तंचराचरं॥४॥तेनरूपेणदेवेशस्वार्चायांसंनि
धोभव॥५जिनमंत्॥सयजमानआचार्योदंडवन्नमस्कुर्यात्

चल० पुष्पांजलिंदत्वा ॥ देवेपंचांगन्यासंकुर्यात् ॥ देवमनेकधासं प्रति०
७ प्रार्थ्य ॥ शरणागतोयंयजमानस्यकुलस्सर्वदासानुग्रहदृष्टि
र्भवति ॥ पुनःपुष्पांजलिंदत्वा ॥ पुनःस्वस्मिन्तमेवन्यासं
कृत्वा ॥ देवपार्श्वस्थकलशैःब्राह्मणसहितोयजमानस्यस
कुटुंबस्यसमुद्रज्येष्ठाइत्यादिसुरास्त्वेत्यादिभिश्चअभि
षेकंकुर्यात् ॥ अथयजमानः ॥ गवादिदक्षिणांआचार्याय
अन्येभ्यश्चदक्षिणांदत्वा ॥ यथाशक्तिब्राह्मणान्भोजयि ७
त्वा ॥ परमेश्वरार्पणंकृत्वा ॥ ॥ इत्यनंतदेवराजकृते धर्मे

(8A)

कौस्तुभे बौधायनोक्तसंक्षिप्तचलार्चाविधिः समाप्तः ॥१६
॥१६॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(९)

॥ इतिचक्रगतिभ्रमसमाप्तः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com